# shrI subrahmaNya sahasranAma stotram

# શ્રીસુબ્રહ્મણ્યસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : subrahmaNya sahasranaama stotra

File name : subrasahasra.itx

Category : sahasranAma, subrahmanya, stotra

Location : doc_subrahmanya

Transliterated by : Kirk Wortman <kirkwort at hotmail.com>

Proofread by : Kirk Wortman <kirkwort at hotmail.com>, KSR Ramachandran kalksr at gmail.com

Description-comments : From skaanda mahaapuraaNa

Latest update : June 13, 2010

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2020

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્યસહસ્રનામસ્તોત્રમ્

ઋષય ઊચુઃ -
સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞ સર્વલોકોપકારક ।
વયં ચાતિથયઃ પ્રાપ્તા આતિથેયોઽસિ સુવ્રત ॥ ૧॥

જ્ઞાનદાનેન સંસારસાગરાત્તારયસ્વ નઃ ।
કલૌ કલુષચિત્તા યે નરાઃ પાપરતાઃ સદા ॥ ૨॥

કેન સ્તોત્રેણ મુચ્યન્તે સર્વપાતકબન્ધનૈઃ ।
ઇષ્ટસિદ્ધિકરં પુણ્યં દુઃખદારિદ્ર્યનાશનમ્ ॥ ૩॥

સર્વરોગહરં સ્તોત્રં સૂત નો વક્તુમર્હસિ ।
શ્રીસૂત ઉવાચ -
શ‍ૃણુધ્વમ્ ઋષયઃ સર્વે નૈમિષારણ્યવાસિનઃ ॥ ૪॥

તત્ત્વજ્ઞાનતપોનિષ્ઠાઃ સર્વશાસ્ત્રવિશારદાઃ ।
સ્વયંભુવા પુરા પ્રોક્તં નારદાય મહાત્મને ॥ ૫॥

તદહં સંપ્રવક્ષ્યામિ શ્રોતું કૌતૂહલં યદિ ।
ઋષય ઊચુઃ -
કિમાહ ભગવાન્બ્રહ્મા નારદાય મહાત્મને ॥ ૬॥

સૂતપુત્ર મહાભાગ વક્તુમર્હસિ સાંપ્રતમ્ ।
શ્રીસૂત ઉવાચ -
દિવ્યસિંહાસનાસીનં સર્વદેવૈરભિષ્ટુતમ્ ॥ ૭॥

સાષ્ટાઙ્ગપ્રણિપત્યૈનં બ્રહ્માણં ભુવનેશ્વરમ્ ।
નારદઃ પરિપપ્રચ્છ કૃતાઞ્જલિરુપસ્થિતઃ ॥ ૮॥

નારદ ઉવાચ -
લોકનાથ સુરશ્રેષ્ઠ સર્વજ્ઞ કરુણાકર ।
ષણ્મુખસ્ય પરં સ્તોત્રં પાવનં પાપનાશનમ્ ॥ ૯॥

ધાતસ્ત્વં પુત્રવાત્સલ્યાત્તદ્વદ પ્રણતાય મે ।
ઉપદિશ્ય તુ માં દેવ રક્ષ રક્ષ કૃપાનિધે ॥ ૧૦॥

બ્રહ્મા ઉવાચ -
શૃણુ વક્ષ્યામિ દેવર્ષે સ્તવરાજમિમં પરમ્ ।
માતૃકામાલિકાયુક્તં જ્ઞાનમોક્ષસુખપ્રદમ્ ॥ ૧૧॥

સહસ્રાણિ ચ નામાનિ ષણ્મુખસ્ય મહાત્મનઃ ।
યાનિ નામાનિ દિવ્યાનિ દુઃખરોગહરાણિ ચ ॥ ૧૨॥

તાનિ નામાનિ વક્ષ્યામિ કૃપયા ત્વયિ નારદ ।
જપમાત્રેણ સિધ્યન્તિ મનસા ચિન્તિતાન્યપિ ॥ ૧૩॥

ઇહામુત્ર પરં ભોગં લભતે નાત્ર સંશયઃ ।
ઇદં સ્તોત્રં પરં પુણ્યં કોટિયજ્ઞફલપ્રદમ્ ।
સન્દેહો નાત્ર કર્તવ્યઃ શૃણુ મે નિશ્ચિતં વચઃ ॥ ૧૪॥

ૐ અસ્ય શ્રીસુબ્રહ્મણ્યસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય ।
બ્રહ્મા ઋષિઃ । અનુષ્ટુપ્છન્દઃ । સુબ્રહ્મણ્યો દેવતા ।
શરજન્માક્ષય ઇતિ બીજમ્ । શક્તિધરોઽક્ષય ઇતિ શક્તિઃ ।
કાર્તિકેય ઇતિ કીલકમ્ । ક્રૌંચભેદીત્યર્ગલમ્ ।
શિખિવાહન ઇતિ કવચમ્ । ષણ્મુખ ઇતિ ધ્યાનમ્ ।
શ્રીસુબ્રહ્મણ્યપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।

ધ્યાનમ્ -
ધ્યાયેત્ષણ્મુખમિન્દુકોટિસદૃશં રત્નપ્રભાશોભિતમ્ ।
બાલાર્કદ્યુતિષટ્કિરીટવિલસત્કેયૂરહારાન્વિતમ્ ॥ ૧॥

કર્ણાલમ્બિતકુણ્ડલપ્રવિલસદ્ગણ્ડસ્થલાશોભિતમ્ ।
કાઞ્ચીકઙ્કણકિંકિણીરવયુતં શૃઙ્ગારસારોદયમ્ ॥ ૨॥

ધ્યાયેદીપ્સિતસિદ્ધિદં શિવસુતં શ્રીદ્વાદશાક્ષં ગુહમ્ ।
ખેટં કુક્કુટમંકુશં ચ વરદં પાશં ધનુશ્ચક્રકમ્ ॥

૩॥

વજ્રં શક્તિમસિં ચ શૂલમભયં દોર્ભિર્ધૃતં ષણ્મુખમ્ ।
દેવં ચિત્રમયૂરવાહનગતં ચિત્રામ્બરાલંકૃતમ્ ॥ ૪॥

॥ સુબ્રહ્મણ્ય સહસ્રનામ સ્તોત્રમ્ ॥

અચિન્ત્યશક્તિરનઘસ્ત્વક્ષોભ્યસ્ત્વપરાજિતઃ ।
અનાથવત્સલોઽમોઘસ્ત્વશોકોઽપ્યજરોઽભયઃ ॥ ૧॥

અત્યુદારો હ્યઘહરસ્ત્વગ્રગણ્યોઽદ્રિજાસુતઃ ।
અનન્તમહિમાઽપારોઽનન્તસૌખ્યપ્રદોઽવ્યયઃ ॥ ૨॥

અનન્તમોક્ષદોઽનાદિરપ્રમેયોઽક્ષરોઽચ્યુતઃ ।
અકલ્મષોઽભિરામોઽગ્રધુર્યશ્ચામિતવિક્રમઃ ॥ ૩॥

અનાથનાથો હ્યમલો હ્યપ્રમત્તોઽમરપ્રભુઃ ।
અરિન્દમોઽખિલાધારસ્ત્વણિમાદિગુણોઽગ્રણીઃ ॥ ૪॥

અચઞ્ચલોઽમરસ્તુત્યો હ્યકલઙ્કોઽમિતાશનઃ ।
અગ્નિભૂરનવદ્યાઙ્ગો હ્યદ્ભુતોઽભીષ્ટદાયકઃ ॥ ૫॥

અતીન્દ્રિયોઽપ્રમેયાત્મા હ્યદૃશ્યોઽવ્યક્તલક્ષણઃ ।
આપદ્વિનાશકસ્ત્વાર્ય આઢ્ય આગમસંસ્તુતઃ ॥ ૬॥

આર્તસંરક્ષણસ્ત્વાદ્ય આનન્દસ્ત્વાર્યસેવિતઃ ।
આશ્રિતેષ્ટાર્થવરદ આનન્દ્યાર્તફલપ્રદઃ ॥ ૭॥

આશ્ચર્યરૂપ આનન્દ આપન્નાર્તિવિનાશનઃ ।
ઇભવક્ત્રાનુજસ્ત્વિષ્ટ ઇભાસુરહરાત્મજઃ ॥ ૮॥

ઇતિહાસશ્રુતિસ્તુત્ય ઇન્દ્રભોગફલપ્રદઃ ।
ઇષ્ટાપૂર્તફલપ્રાપ્તિરિષ્ટેષ્ટવરદાયકઃ ॥ ૯॥

ઇહામુત્રેષ્ટફલદ ઇષ્ટદસ્ત્વિન્દ્રવન્દિતઃ ।
ઈડનીયસ્ત્વીશપુત્ર ઈપ્સિતાર્થપ્રદાયકઃ ॥ ૧૦॥

ઈતિભીતિહરશ્ચેડ્ય ઈષણાત્રયવર્જિતઃ ।
ઉદારકીર્તિરુદ્યોગી ચોત્કૃષ્ટોરુપરાક્રમઃ ॥ ૧૧॥

ઉત્કૃષ્ટશક્તિરુત્સાહ ઉદારશ્ચોત્સવપ્રિયઃ ।
ઉજ્જૃમ્ભ ઉદ્ભવશ્ચોગ્ર ઉદગ્રશ્ચોગ્રલોચનઃ ॥ ૧૨॥

ઉન્મત્ત ઉગ્રશમન ઉદ્વેગઘ્નોરગેશ્વરઃ ।
ઉરુપ્રભાવશ્ચોદીર્ણ ઉમાપુત્ર ઉદારધીઃ ॥ ૧૩॥

ઊર્ધ્વરેતઃસુતસ્તૂર્ધ્વગતિદસ્તૂર્જપાલકઃ ।
ઊર્જિતસ્તૂર્ધ્વગસ્તૂર્ધ્વ ઊર્ધ્વલોકૈકનાયકઃ ॥ ૧૪॥

ઊર્જિવાનૂર્જિતોદાર ઊર્જિતોર્જિતશાસનઃ ।
ઋષિદેવગણસ્તુત્ય ઋણત્રયવિમોચનઃ ॥ ૧૫॥

ઋજુરૂપો હ્યૃજુકર ઋજુમાર્ગપ્રદર્શનઃ ।
ઋતંભરો હ્યૃજુપ્રીત ઋષભસ્ત્વૃદ્ધિદસ્ત્વૃતઃ ॥ ૧૬॥

લુલિતોદ્ધારકો લૂતભવપાશપ્રભઞ્જનઃ ।
એણાઙ્કધરસત્પુત્ર એક એનોવિનાશનઃ ॥ ૧૭॥

ઐશ્વર્યદશ્ચૈન્દ્રભોગી ચૈતિહ્યશ્ચૈન્દ્રવન્દિતઃ ।
ઓજસ્વી ચૌષધિસ્થાનમોજોદશ્ચૌદનપ્રદઃ ॥ ૧૮॥

ઔદાર્યશીલ ઔમેય ઔગ્ર ઔન્નત્યદાયકઃ ।
ઔદાર્ય ઔષધકર ઔષધં ચૌષધાકરઃ ॥ ૧૯॥

અંશુમાલ્યંશુમાલીડ્ય અમ્બિકાતનયોઽન્નદઃ ।
અન્ધકારિસુતોઽન્ધત્વહારી ચામ્બુજલોચનઃ ॥ ૨૦॥

અસ્તમાયોઽમરાધીશો હ્યસ્પષ્ટોઽસ્તોકપુણ્યદઃ ।
અસ્તામિત્રોઽસ્તરૂપશ્ચાસ્ખલત્સુગતિદાયકઃ ॥ ૨૧॥

કાર્તિકેયઃ કામરૂપઃ કુમારઃ ક્રૌઞ્ચદારણઃ ।
કામદઃ કારણં કામ્યઃ કમનીયઃ કૃપાકરઃ ॥ ૨૨॥

કાઞ્ચનાભઃ કાન્તિયુક્તઃ કામી કામપ્રદઃ કવિઃ ।
કીર્તિકૃત્કુક્કુટધરઃ કૂટસ્થઃ કુવલેક્ષણઃ ॥ ૨૩॥

કુઙ્કુમાઙ્ગઃ ક્લમહરઃ કુશલઃ કુક્કુટધ્વજઃ ।
કુશાનુસંભવઃ ક્રૂરઃ ક્રૂરઘ્નઃ કલિતાપહૃત્ ॥ ૨૪॥

કામરૂપઃ કલ્પતરુઃ કાન્તઃ કામિતદાયકઃ ।
કલ્યાણકૃત્ક્લેશનાશઃ કૃપાલુઃ કરુણાકરઃ ॥ ૨૫॥

કલુષઘ્નઃ ક્રિયાશક્તિઃ કઠોરઃ કવચી કૃતી ।
કોમલાઙ્ગઃ કુશપ્રીતઃ કુત્સિતઘ્નઃ કલાધરઃ ॥ ૨૬॥

ખ્યાતઃ ખેટધરઃ ખડ્ગી ખટ્વાઙ્ગી ખલનિગ્રહઃ ।

ખ્યાતિપ્રદઃ ખેચરેશઃ ખ્યાતેહઃ ખેચરસ્તુતઃ ॥ ૨૭॥

ખરતાપહરઃ સ્વસ્થઃ ખેચરઃ ખેચરાશ્રયઃ ।
ખણ્ડેન્દુમૌલિતનયઃ ખેલઃ ખેચરપાલકઃ ॥ ૨૮॥

ખસ્થલઃ ખણ્ડિતાર્કશ્ચ ખેચરીજનપૂજિતઃ ।
ગાઙ્ગેયો ગિરિજાપુત્રો ગણનાથાનુજો ગુહઃ ॥ ૨૯॥

ગોપ્તા ગીર્વાણસંસેવ્યો ગુણાતીતો ગુહાશ્રયઃ ।
ગતિપ્રદો ગુણનિધિઃ ગમ્ભીરો ગિરિજાત્મજઃ ॥ ૩૦॥

ગૂઢરૂપો ગદહરો ગુણાધીશો ગુણાગ્રણીઃ ।
ગોધરો ગહનો ગુપ્તો ગર્વઘ્નો ગુણવર્ધનઃ ॥ ૩૧॥

ગુહ્યો ગુણજ્ઞો ગીતિજ્ઞો ગતાતઙ્કો ગુણાશ્રયઃ ।
ગદ્યપદ્યપ્રિયો ગુણ્યો ગોસ્તુતો ગગનેચરઃ ॥ ૩૨॥

ગણનીયચરિત્રશ્ચ ગતક્લેશો ગુણાર્ણવઃ ।
ઘૂર્ણિતાક્ષો ઘૃણિનિધિઃ ઘનગમ્ભીરઘોષણઃ ॥ ૩૩॥

ઘણ્ટાનાદપ્રિયો ઘોષો ઘોરાઘૌઘવિનાશનઃ ।
ઘનાનન્દો ઘર્મહન્તા ઘૃણાવાન્ ઘૃષ્ટિપાતકઃ ॥ ૩૪॥

ઘૃણી ઘૃણાકરો ઘોરો ઘોરદૈત્યપ્રહારકઃ ।
ઘટિતૈશ્વર્યસંદોહો ઘનાર્થો ઘનસંક્રમઃ ॥ ૩૫॥

ચિત્રકૃચ્ચિત્રવર્ણશ્ચ ચઞ્ચલશ્ચપલદ્યુતિઃ ।
ચિન્મયશ્ચિત્સ્વરૂપશ્ચ ચિરાનન્દશ્ચિરંતનઃ ॥ ૩૬॥

ચિત્રકેલિશ્ચિત્રતરશ્ચિન્તનીયશ્ચમત્કૃતિઃ ।
ચોરઘ્નશ્ચતુરશ્ચારુશ્ચામીકરવિભૂષણઃ ॥ ૩૭॥

ચન્દ્રાર્કકોટિસદૃશશ્ચન્દ્રમૌલિતનૂભવઃ ।
છાદિતાઙ્ગશ્છદ્મહન્તા છેદિતાખિલપાતકઃ ॥ ૩૮॥

છેદીકૃતતમઃક્લેશશ્છત્રીકૃતમહાયશાઃ ।
છાદિતાશેષસંતાપશ્છરિતામૃતસાગરઃ ॥ ૩૯॥

છન્નત્રૈગુણ્યરૂપશ્ચ છાતેહશ્છિન્નસંશયઃ ।
છન્દોમયશ્છન્દગામી છિન્નપાશશ્છવિશ્છદઃ ॥ ૪૦॥

જગદ્ધિતો જગત્પૂજ્યો જગજ્જ્યેષ્ઠો જગન્મયઃ ।
જનકો જાહ્નવીસૂનુર્જિતામિત્રો જગદ્ગુરુઃ ॥ ૪૧॥

જયી જિતેન્દ્રિયો જૈત્રો જરામરણવર્જિતઃ ।
જ્યોતિર્મયો જગન્નાથો જગજ્જીવો જનાશ્રયઃ ॥ ૪૨॥

જગત્સેવ્યો જગત્કર્તા જગત્સાક્ષી જગત્પ્રિયઃ ।
જમ્ભારિવન્દ્યો જયદો જગજ્જનમનોહરઃ ॥ ૪૩॥

જગદાનન્દજનકો જનજાડ્યાપહારકઃ ।
જપાકુસુમસંકાશો જનલોચનશોભનઃ ॥ ૪૪॥

જનેશ્વરો જિતક્રોધો જનજન્મનિબર્હણઃ ।
જયદો જન્તુતાપઘ્નો જિતદૈત્યમહાવ્રજઃ ॥ ૪૫॥

જિતમાયો જિતક્રોધો જિતસઙ્ગો જનપ્રિયઃ ।
ઝંઝાનિલમહાવેગો ઝરિતાશેષપાતકઃ ॥ ૪૬॥

ઝર્ઝરીકૃતદૈત્યૌઘો ઝલ્લરીવાદ્યસંપ્રિયઃ ।
જ્ઞાનમૂર્તિર્જ્ઞાનગમ્યો જ્ઞાની જ્ઞાનમહાનિધિઃ ॥ ૪૭॥

ટંકારનૃત્તવિભવઃ ટંકવજ્રધ્વજાઙ્કિતઃ ।
ટંકિતાખિલલોકશ્ચ ટંકિતૈનસ્તમોરવિઃ ॥ ૪૮॥

ડમ્બરપ્રભવો ડમ્ભો ડમ્બો ડમરુકપ્રિયઃ ।
ડમરોત્કટસન્નાદો ડિંભરૂપસ્વરૂપકઃ ॥ ૪૯॥

ઢક્કાનાદપ્રીતિકરો ઢાલિતાસુરસંકુલઃ ।
ઢૌકિતામરસંદોહો ઢુણ્ઢિવિઘ્નેશ્વરાનુજઃ ॥ ૫૦॥

તત્ત્વજ્ઞસ્તત્વગસ્તીવ્રસ્તપોરૂપસ્તપોમયઃ ।
ત્રયીમયસ્ત્રિકાલજ્ઞસ્ત્રિમૂર્તિસ્ત્રિગુણાત્મકઃ ॥ ૫૧॥

ત્રિદશેશસ્તારકારિસ્તાપઘ્નસ્તાપસપ્રિયઃ ।
તુષ્ટિદસ્તુષ્ટિકૃત્તીક્ષ્ણસ્તપોરૂપસ્ત્રિકાલવિત્ ॥ ૫૨॥

સ્તોતા સ્તવ્યઃ સ્તવપ્રીતઃ સ્તુતિઃ સ્તોત્રં સ્તુતિપ્રિયઃ ।
સ્થિતઃ સ્થાયી સ્થાપકશ્ચ સ્થૂલસૂક્ષ્મપ્રદર્શકઃ ॥ ૫૩॥

સ્થવિષ્ઠઃ સ્થવિરઃ સ્થૂલઃ સ્થાનદઃ સ્થૈર્યદઃ સ્થિરઃ ।
દાન્તો દયાપરો દાતા દુરિતઘ્નો દુરાસદઃ ॥ ૫૪॥

દર્શનીયો દયાસારો દેવદેવો દયાનિધિઃ ।
દુરાધર્ષો દુર્વિગાહ્યો દક્ષો દર્પણશોભિતઃ ॥ ૫૫॥

દુર્ધરો દાનશીલશ્ચ દ્વાદશાક્ષો દ્વિષડ્ભુજઃ ।
દ્વિષટ્કર્ણો દ્વિષડ્બાહુર્દીનસંતાપનાશનઃ ॥ ૫૬॥

દન્દશૂકેશ્વરો દેવો દિવ્યો દિવ્યાકૃતિર્દમઃ ।
દીર્ઘવૃત્તો દીર્ઘબાહુર્દીર્ઘદૃષ્ટિર્દિવસ્પતિઃ ॥ ૫૭॥

દણ્ડો દમયિતા દર્પો દેવસિંહો દૃઢવ્રતઃ ।
દુર્લભો દુર્ગમો દીપ્તો દુષ્પ્રેક્ષ્યો દિવ્યમણ્ડનઃ ॥ ૫૮॥

દુરોદરઘ્નો દુઃખઘ્નો દુરારિઘ્નો દિશાંપતિઃ ।
દુર્જયો દેવસેનેશો દુર્જ્ઞેયો દુરતિક્રમઃ ॥ ૫૯॥

દમ્ભો દૃપ્તશ્ચ દેવર્ષિર્દૈવજ્ઞો દૈવચિન્તકઃ ।
ધુરંધરો ધર્મપરો ધનદો ધૃતિવર્ધનઃ ॥ ૬૦॥

ધર્મેશો ધર્મશાસ્ત્રજ્ઞો ધન્વી ધર્મપરાયણઃ ।
ધનાધ્યક્ષો ધનપતિર્ધૃતિમાન્ધૂતકિલ્બિષઃ ॥ ૬૧॥

ધર્મહેતુર્ધર્મશૂરો ધર્મકૃદ્ધર્મવિદ્ ધ્રુવઃ ।
ધાતા ધીમાન્ધર્મચારી ધન્યો ધુર્યો ધૃતવ્રતઃ ॥ ૬૨॥

નિત્યોત્સવો નિત્યતૃપ્તો નિર્લેપો નિશ્ચલાત્મકઃ ।
નિરવદ્યો નિરાધારો નિષ્કલઙ્કો નિરઞ્જનઃ ॥ ૬૩॥

નિર્મમો નિરહંકારો નિર્મોહો નિરુપદ્રવઃ ।
નિત્યાનન્દો નિરાતઙ્કો નિષ્પ્રપઞ્ચો નિરામયઃ ॥ ૬૪॥

નિરવદ્યો નિરીહશ્ચ નિર્દર્શો નિર્મલાત્મકઃ ।
નિત્યાનન્દો નિર્જરેશો નિઃસઙ્ગો નિગમસ્તુતઃ ॥ ૬૫॥

નિષ્કણ્ટકો નિરાલમ્બો નિષ્પ્રત્યૂહો નિરુદ્ભવઃ ।
નિત્યો નિયતકલ્યાણો નિર્વિકલ્પો નિરાશ્રયઃ ॥ ૬૬॥

નેતા નિધિર્નૈકરૂપો નિરાકારો નદીસુતઃ ।
પુલિન્દકન્યારમણઃ પુરુજિત્પરમપ્રિયઃ ॥ ૬૭॥

પ્રત્યક્ષમૂર્તિઃ પ્રત્યક્ષઃ પરેશઃ પૂર્ણપુણ્યદઃ ।

પુણ્યાકરઃ પુણ્યરૂપઃ પુણ્યઃ પુણ્યપરાયણઃ ॥ ૬૮॥

પુણ્યોદયઃ પરં જ્યોતિઃ પુણ્યકૃત્પુણ્યવર્ધનઃ ।
પરાનન્દઃ પરતરઃ પુણ્યકીર્તિઃ પુરાતનઃ ॥ ૬૯॥

પ્રસન્નરૂપઃ પ્રાણેશઃ પન્નગઃ પાપનાશનઃ ।
પ્રણતાર્તિહરઃ પૂર્ણઃ પાર્વતીનન્દનઃ પ્રભુઃ ॥ ૭૦॥

પૂતાત્મા પુરુષઃ પ્રાણઃ પ્રભવઃ પુરુષોત્તમઃ ।
પ્રસન્નઃ પરમસ્પષ્ટઃ પરઃ પરિવૃઢઃ પરઃ ॥ ૭૧॥

પરમાત્મા પરબ્રહ્મ પરાર્થઃ પ્રિયદર્શનઃ ।
પવિત્રઃ પુષ્ટિદઃ પૂર્તિઃ પિઙ્ગલઃ પુષ્ટિવર્ધનઃ ॥ ૭૨॥

પાપહારી પાશધરઃ પ્રમત્તાસુરશિક્ષકઃ ।
પાવનઃ પાવકઃ પૂજ્યઃ પૂર્ણાનન્દઃ પરાત્પરઃ ॥ ૭૩॥

પુષ્કલઃ પ્રવરઃ પૂર્વઃ પિતૃભક્તઃ પુરોગમઃ ।
પ્રાણદઃ પ્રાણિજનકઃ પ્રદિષ્ટઃ પાવકોદ્ભવઃ ॥ ૭૪॥

પરબ્રહ્મસ્વરૂપશ્ચ પરમૈશ્વર્યકારણમ્ ।
પરર્દ્ધિદઃ પુષ્ટિકરઃ પ્રકાશાત્મા પ્રતાપવાન્ ॥ ૭૫॥

પ્રજ્ઞાપરઃ પ્રકૃષ્ટાર્થઃ પૃથુઃ પૃથુપરાક્રમઃ ।
ફણીશ્વરઃ ફણિવરઃ ફણામણિવિભૂષણઃ ॥ ૭૬॥

ફલદઃ ફલહસ્તશ્ચ ફુલ્લામ્બુજવિલોચનઃ ।
ફડુચ્ચાટિતપાપૌઘઃ ફણિલોકવિભૂષણઃ ॥ ૭૭॥

બાહુલેયો બૃહદ્રૂપો બલિષ્ઠો બલવાન્ બલી ।
બ્રહ્મેશવિષ્ણુરૂપશ્ચ બુદ્ધો બુદ્ધિમતાં વરઃ ॥ ૭૮॥

બાલરૂપો બ્રહ્મગર્ભો બ્રહ્મચારી બુધપ્રિયઃ ।
બહુશ્રુતો બહુમતો બ્રહ્મણ્યો બ્રાહ્મણપ્રિયઃ ॥ ૭૯॥

બલપ્રમથનો બ્રહ્મા બહુરૂપો બહુપ્રદઃ ।
બૃહદ્ભાનુતનૂદ્ભૂતો બૃહત્સેનો બિલેશયઃ ॥ ૮૦॥

બહુબાહુર્બલશ્રીમાન્ બહુદૈત્યવિનાશકઃ ।
બિલદ્વારાન્તરાલસ્થો બૃહચ્છક્તિધનુર્ધરઃ ॥ ૮૧॥

બાલાર્કદ્યુતિમાન્ બાલો બૃહદ્વક્ષા બૃહદ્ધનુઃ ।
ભવ્યો ભોગીશ્વરો ભાવ્યો ભવનાશો ભવપ્રિયઃ ॥ ૮૨॥

ભક્તિગમ્યો ભયહરો ભાવજ્ઞો ભક્તસુપ્રિયઃ ।
ભુક્તિમુક્તિપ્રદો ભોગી ભગવાન્ ભાગ્યવર્ધનઃ ॥ ૮૩॥

ભ્રાજિષ્ણુર્ભાવનો ભર્તા ભીમો ભીમપરાક્રમઃ ।
ભૂતિદો ભૂતિકૃદ્ભોક્તા ભૂતાત્મા ભુવનેશ્વરઃ ॥ ૮૪॥

ભાવકો ભીકરો ભીષ્મો ભાવકેષ્ટો ભવોદ્ભવઃ ।
ભવતાપપ્રશમનો ભોગવાન્ ભૂતભાવનઃ ॥ ૮૫॥

ભોજ્યપ્રદો ભ્રાન્તિનાશો ભાનુમાન્ ભુવનાશ્રયઃ ।
ભૂરિભોગપ્રદો ભદ્રો ભજનીયો ભિષગ્વરઃ ॥ ૮૬॥

મહાસેનો મહોદારો મહાશક્તિર્મહાદ્યુતિઃ ।
મહાબુદ્ધિર્મહાવીર્યો મહોત્સાહો મહાબલઃ ॥ ૮૭॥

મહાભોગી મહામાયી મેધાવી મેખલી મહાન્ ।
મુનિસ્તુતો મહામાન્યો મહાનન્દો મહાયશાઃ ॥ ૮૮॥

મહોર્જિતો માનનિધિર્મનોરથફલપ્રદઃ ।
મહોદયો મહાપુણ્યો મહાબલપરાક્રમઃ ॥ ૮૯॥

માનદો મતિદો માલી મુક્તામાલાવિભૂષણઃ ।
મનોહરો મહામુખ્યો મહર્દ્ધિર્મૂર્તિમાન્મુનિઃ ॥ ૯૦॥

મહોત્તમો મહોપાયો મોક્ષદો મઙ્ગલપ્રદઃ ।
મુદાકરો મુક્તિદાતા મહાભોગો મહોરગઃ ॥ ૯૧॥

યશસ્કરો યોગયોનિર્યોગિષ્ઠો યમિનાં વરઃ ।
યશસ્વી યોગપુરુષો યોગ્યો યોગનિધિર્યમી ॥ ૯૨॥

યતિસેવ્યો યોગયુક્તો યોગવિદ્યોગસિદ્ધિદઃ ।
યન્ત્રો યન્ત્રી ચ યન્ત્રજ્ઞો યન્ત્રવાન્યન્ત્રવાહકઃ ॥ ૯૩॥

યાતનારહિતો યોગી યોગીશો યોગિનાં વરઃ ।
રમણીયો રમ્યરૂપો રસજ્ઞો રસભાવનઃ ॥ ૯૪॥

રઞ્જનો રઞ્જિતો રાગી રુચિરો રુદ્રસંભવઃ ।
રણપ્રિયો રણોદારો રાગદ્વેષવિનાશનઃ ॥ ૯૫॥

રત્નાર્ચી રુચિરો રમ્યો રૂપલાવણ્યવિગ્રહઃ ।
રત્નાઙ્ગદધરો રત્નભૂષણો રમણીયકઃ ॥ ૯૬॥

રુચિકૃદ્રોચમાનશ્ચ રઞ્જિતો રોગનાશનઃ ।
રાજીવાક્ષો રાજરાજો રક્તમાલ્યાનુલેપનઃ ॥ ૯૭॥

રાજદ્વેદાગમસ્તુત્યો રજઃસત્ત્વગુણાન્વિતઃ ।
રજનીશકલારમ્યો રત્નકુણ્ડલમણ્ડિતઃ ॥ ૯૮॥

રત્નસન્મૌલિશોભાઢ્યો રણન્મઞ્જીરભૂષણઃ ।
લોકૈકનાથો લોકેશો લલિતો લોકનાયકઃ ॥ ૯૯॥

લોકરક્ષો લોકશિક્ષો લોકલોચનરઞ્જિતઃ ।
લોકબન્ધુર્લોકધાતા લોકત્રયમહાહિતઃ ॥ ૧૦૦॥

લોકચૂડામણિર્લોકવન્દ્યો લાવણ્યવિગ્રહઃ ।
લોકાધ્યક્ષસ્તુ લીલાવાન્લોકોત્તરગુણાન્વિતઃ ॥ ૧૦૧॥

વરિષ્ઠો વરદો વૈદ્યો વિશિષ્ટો વિક્રમો વિભુઃ ।
વિબુધાગ્રચરો વશ્યો વિકલ્પપરિવર્જિતઃ ॥ ૧૦૨॥

વિપાશો વિગતાતઙ્કો વિચિત્રાઙ્ગો વિરોચનઃ ।
વિદ્યાધરો વિશુદ્ધાત્મા વેદાઙ્ગો વિબુધપ્રિયઃ ॥ ૧૦૩॥

વચસ્કરો વ્યાપકશ્ચ વિજ્ઞાની વિનયાન્વિતઃ ।
વિદ્વત્તમો વિરોધિઘ્નો વીરો વિગતરાગવાન્ ॥ ૧૦૪॥

વીતભાવો વિનીતાત્મા વેદગર્ભો વસુપ્રદઃ ।
વિશ્વદીપ્તિર્વિશાલાક્ષો વિજિતાત્મા વિભાવનઃ ॥ ૧૦૫॥

વેદવેદ્યો વિધેયાત્મા વીતદોષશ્ચ વેદવિત્ ।
વિશ્વકર્મા વીતભયો વાગીશો વાસવાર્ચિતઃ ॥ ૧૦૬॥

વીરધ્વંસો વિશ્વમૂર્તિર્વિશ્વરૂપો વરાસનઃ ।
વિશાખો વિમલો વાગ્મી વિદ્વાન્વેદધરો વટુઃ ॥ ૧૦૭॥

વીરચૂડામણિર્વીરો વિદ્યેશો વિબુધાશ્રયઃ ।
વિજયી વિનયી વેત્તા વરીયાન્વિરજા વસુઃ ॥ ૧૦૮॥

વીરઘ્નો વિજ્વરો વેદ્યો વેગવાન્વીર્યવાન્વશી ।

વરશીલો વરગુણો વિશોકો વજ્રધારકઃ ॥ ૧૦૯॥

શરજન્મા શક્તિધરઃ શત્રુઘ્નઃ શિખિવાહનઃ ।
શ્રીમાન્શિષ્ટઃ શુચિઃ શુદ્ધઃ શાશ્વતો શ્રુતિસાગરઃ ॥ ૧૧૦॥

શરણ્યઃ શુભદઃ શર્મ શિષ્ટેષ્ટઃ શુભલક્ષણઃ ।
શાન્તઃ શૂલધરઃ શ્રેષ્ઠઃ શુદ્ધાત્મા શઙ્કરઃ શિવઃ ॥ ૧૧૧॥

શિતિકણ્ઠાત્મજઃ શૂરઃ શાન્તિદઃ શોકનાશનઃ ।
ષાણ્માતુરઃ ષણ્મુખશ્ચ ષડ્ગુણૈશ્વર્યસંયુતઃ ॥ ૧૧૨॥

ષટ્ચક્રસ્થઃ ષડૂર્મિઘ્નઃ ષડઙ્ગશ્રુતિપારગઃ ।
ષડ્ભાવરહિતઃ ષટ્કઃ ષટ્શાસ્ત્રસ્મૃતિપારગઃ ॥ ૧૧૩॥

ષડ્વર્ગદાતા ષડ્ગ્રીવઃ ષડરિઘ્નઃ ષડાશ્રયઃ ।
ષટ્કિરીટધરઃ શ્રીમાન્ ષડાધારશ્ચ ષટ્ક્રમઃ ॥ ૧૧૪॥

ષટ્કોણમધ્યનિલયઃ ષણ્ડત્વપરિહારકઃ ।
સેનાનીઃ સુભગઃ સ્કન્દઃ સુરાનન્દઃ સતાં ગતિઃ ॥ ૧૧૫॥

સુબ્રહ્મણ્યઃ સુરાધ્યક્ષઃ સર્વજ્ઞઃ સર્વદઃ સુખી ।
સુલભઃ સિદ્ધિદઃ સૌમ્યઃ સિદ્ધેશઃ સિદ્ધિસાધનઃ ॥ ૧૧૬॥

સિદ્ધાર્થઃ સિદ્ધસંકલ્પઃ સિદ્ધસાધુઃ સુરેશ્વરઃ ।
સુભુજઃ સર્વદૃક્સાક્ષી સુપ્રસાદઃ સનાતનઃ ॥ ૧૧૭॥

સુધાપતિઃ સ્વયંજ્યોતિઃ સ્વયંભૂઃ સર્વતોમુખઃ ।
સમર્થઃ સત્કૃતિઃ સૂક્ષ્મઃ સુઘોષઃ સુખદઃ સુહૃત્ ॥ ૧૧૮॥

સુપ્રસન્નઃ સુરશ્રેષ્ઠઃ સુશીલઃ સત્યસાધકઃ ।
સંભાવ્યઃ સુમનાઃ સેવ્યઃ સકલાગમપારગઃ ॥ ૧૧૯॥

સુવ્યક્તઃ સચ્ચિદાનન્દઃ સુવીરઃ સુજનાશ્રયઃ ।
સર્વલક્ષણસંપન્નઃ સત્યધર્મપરાયણઃ ॥ ૧૨૦॥

સર્વદેવમયઃ સત્યઃ સદા મૃષ્ટાન્નદાયકઃ ।
સુધાપી સુમતિઃ સત્યઃ સર્વવિઘ્નવિનાશનઃ ॥ ૧૨૧॥

સર્વદુઃખપ્રશમનઃ સુકુમારઃ સુલોચનઃ ।
સુગ્રીવઃ સુધૃતિઃ સારઃ સુરારાધ્યઃ સુવિક્રમઃ ॥ ૧૨૨॥

સુરારિઘ્નઃ સ્વર્ણવર્ણઃ સર્પરાજઃ સદા શુચિઃ ।
સપ્તાર્ચિર્ભૂઃ સુરવરઃ સર્વાયુધવિશારદઃ ॥ ૧૨૩॥

હસ્તિચર્મામ્બરસુતો હસ્તિવાહનસેવિતઃ ।
હસ્તચિત્રાયુધધરો હૃતાઘો હસિતાનનઃ ॥ ૧૨૪॥

હેમભૂષો હરિદ્વર્ણો હૃષ્ટિદો હૃષ્ટિવર્ધનઃ ।
હેમાદ્રિભિદ્ધંસરૂપો હુંકારહતકિલ્બિષઃ ॥ ૧૨૫॥

હિમાદ્રિજાતાતનુજો હરિકેશો હિરણ્મયઃ ।
હૃદ્યો હૃષ્ટો હરિસખો હંસો હંસગતિર્હવિઃ ॥ ૧૨૬॥

હિરણ્યવર્ણો હિતકૃદ્ધર્ષદો હેમભૂષણઃ ।
હરપ્રિયો હિતકરો હતપાપો હરોદ્ભવઃ ॥ ૧૨૭॥

ક્ષેમદઃ ક્ષેમકૃત્ક્ષેમ્યઃ ક્ષેત્રજ્ઞઃ ક્ષામવર્જિતઃ ।
ક્ષેત્રપાલઃ ક્ષમાધારઃ ક્ષેમક્ષેત્રઃ ક્ષમાકરઃ ॥ ૧૨૮॥

ક્ષુદ્રઘ્નઃ ક્ષાન્તિદઃ ક્ષેમઃ ક્ષિતિભૂષઃ ક્ષમાશ્રયઃ ।
ક્ષાલિતાઘઃ ક્ષિતિધરઃ ક્ષીણસંરક્ષણક્ષમઃ ॥ ૧૨૯॥

ક્ષણભઙ્ગુરસન્નદ્ધઘનશોભિકપર્દકઃ ।
ક્ષિતિભૃન્નાથતનયામુખપઙ્કજભાસ્કરઃ ॥ ૧૩૦॥

ક્ષતાહિતઃ ક્ષરઃ ક્ષન્તા ક્ષતદોષઃ ક્ષમાનિધિઃ ।
ક્ષપિતાખિલસંતાપઃ ક્ષપાનાથસમાનનઃ ॥ ૧૩૧॥

ફલશ્રુતિ -

ઇતિ નામ્નાં સહસ્રાણિ ષણ્મુખસ્ય ચ નારદ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ ભક્તિયુક્તેન ચેતસા ॥ ૧॥

સ સદ્યો મુચ્યતે પાપૈર્મનોવાક્કાયસંભવૈઃ ।
આયુર્વૃદ્ધિકરં પુંસાં સ્થૈર્યવીર્યવિવર્ધનમ્ ॥ ૨॥

વાક્યેનૈકેન વક્ષ્યામિ વાઞ્છિતાર્થં પ્રયચ્છતિ ।
તસ્માત્સર્વાત્મના બ્રહ્મન્નિયમેન જપેત્સુધીઃ ॥ ૩॥

॥ ઇતિ શ્રીસ્કાન્દે મહાપુરાણે ઈશ્વરપ્રોક્તે બ્રહ્મનારદસંવાદે
ષણ્મુખસહસ્રનામસ્તોત્રં સંપૂર્ણમ્ ॥

Encoded by Kirk Wortman kirkwort@hotmail.com

Proofread by Kirk and KSR Ramachandran

*shrI subrahmaNya sahasranAma stotram*

pdf was typeset on June 13, 2020

Please send corrections to *sanskrit@cheerful.com*